# B.K. BIRLA CENTRE FOR EDUCATION

SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

**PRE-BOARD-3 EXAMINATION (2025-26)**
**SANSKRIT (119)**

Class : X
Date :09.01.2026
Admission No.:

**SET -A**

Duration: 3 Hrs
Max. Marks: 80
Roll No.:

---

सामान्यनिर्देशाः -
1. कृपया सम्यकतया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| 'क' खण्डः | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' खण्डः | रचनात्मक कार्यम् | 15 अङ्काः |
| 'ग' खण्डः | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | पठितावबोधनम् | 30 अङ्काः |

3. प्रत्येक खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्य लेखनीयः।
5. प्रश्नस्य कमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीमानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः 'क' अपठितावबोधनम् (10 अङ्काः)

प्रश्न 1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- (10 अङ्काः)

सरसे वसन्ते ऋतौ सीताष्टमी अपि समायोज्यते। इदं पर्व अस्मान् नारीणा सम्मान शिक्षयति। नारी संसारस्य मूलं वर्तते। सा गृहस्थाश्रमस्य जीवनशक्तिः अस्ति। नारी 'देवी' इति कृत्वा सम्बोध्यते। तस्याम् उच्चतायाः भावो वर्तते। आदिकविः वाल्मीकिः महाभागां सीताम् 'अनुपमा' इति कृत्वा कथयति। वस्तुतः जगति सा अद्वितीया आसीत्, तस्याः सुशीलता, सुलक्षणता सच्चरित्रता च अनुकरणीयाः सन्ति। महादेव्याः सीतायाः पावनं जीवनवृत्तं प्रत्येक भारतीयनारीणां कृते एकम् आदर्श वर्तते तद्नुकरणीयमपि अस्ति। अतः सीताष्टम्याः पर्व अन्यवीरपर्वणां जयन्तीनाम् इव अवश्यमेव आयोजनीयम् अस्ति। अनेन बालिकानां कृते शिक्षा आचरण प्राप्तिरपि भवति। यतः नारीशिक्षा सर्वोत्तमास्ति, नारी नराणां स्रोतः इति।

प्रश्नाः-

(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) (1×2=2)

(i) का नराणां स्रोतः अस्ति ?
(ii) सरसे वसन्त ऋतौ का समायोज्यते ?
(iii) संसारस्य मूलं का अस्ति ?

(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयमेव) (2×2=4)

(i) सीतायाः काः अनुकरणीयाः सन्ति ?
(ii) भारतीयनारीणां कृते एकम् आदर्श किं वर्तते ?
(iii) नारी कस्य जीवनशक्तिः अस्ति ?

(इ) अस्य गद्यांशस्य उचितं शीर्षकं लिखत| (1×1=1)

(ई) यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्) (1×3=3)

(i) 'नारी संसारस्य मूलं वर्तते। अत्र कर्तृपदं किम् अस्ति ?

(क) मूलं (ख) वर्तते (ग) नारी (घ) संसारस्य

(ii) अनुच्छेदे 'पवित्र' पदस्य कः पर्यायः प्रयुक्तो वर्तते ?

(क) दिव्यं (ख) नित्यं (ग) पावनं (घ) अनुपमम्

(iii) गद्यांशे 'निम्नतायाः' पदस्य विपर्ययरूपे किं पदं लिखितम ?

(क) उच्चतायाः (ख) विद्यायाः (ग) अवस्थायाः (घ) महादेव्याः

(iv) 'अस्ति' इति क्रियापदस्य कर्तृपदं किम्?

(क) इदं (ख) सा (ग) इव (घ) मूलं

## 'ख' खण्डः
### रचनात्मक कार्यम् (15 अङ्काः)

प्रश्न 2. भवान् संजीवः स्वमित्राय एशियाडक्रीडाविषयकं पत्र लिखति । तस्मिन् पत्रे क्रीडायाः वर्णनं करोति । भवान् स्वपत्रं मञ्जूषायाः सहायतां गृहीत्वा पुनर्लिखतु । (10×½=5)

परीक्षा भवनम् ।
दिनाङ्कः-20.9.20..........

प्रियमित्र राजवीर,
सस्नेहं (i) ----------


भवान् सम्यक् (ii) ---------- एव यद् त्रयोविंशतिवर्षपूर्व भारतदेशे नवम्-एशियाड-क्रीडा (iii) --------- सम्पन्नः आसीत्, तत्र च एकविंशतिः क्रीडाः क्रीडिताः। तासु क्रीडासु (iv) ------- प्रतियोगिता मह्यम् अतिशयरुचिकरा आसीत्। भारतदेशः एतस्यां क्रीडायां त्रीन् स्वर्णपदकान् एकं (v) -------- एकं च रजतपदकमपि जितवान् । भारतीयाः अश्वारोहिणः अतीव उत्साहवन्तः आसन्। ते च वायुना सह आकाशे (vi) ---------- प्रतीयन्ते स्म। अद्यापि अहं तद् दृश्यम् अधुनैव (vii) ---------- इव अनुभवामि ।

(viii) ------------ सादरं नमः।

(ix) ------------ अभिन्नहृदयः,
(x) -------------

| मञ्जूषा |
|---|
| पितृभ्याम्, घटमानम्, महोत्सवः, जानाति, संजीवः, अश्वारोहणधावन, तव, , उड्डीयमानाः, कांस्यपदकम् |

प्रश्न 3. प्रदत्तं चित्रं दृष्ट्वा मंजूषापद सहायतया संस्कृतेन पञ्च वाक्यानि रचयत - (5×1=5)



| मंजूषा |
|---|
| बसस्थानकम्, उपविष्टं, प्रतीक्षा, बसयानम्, चालकः, जनः, दीर्घासन्दिका, पंक्तिबद्धाः, आरोहति, जनसम्मर्दः, अष्ट, एका महिला |

अथवा

'मम विद्यालयः' इति विषयम् अधिकृत्य मञ्जूषापदसाहाय्येन पञ्च संस्कृतवाक्यानि लिखत ।

मञ्जूषा

राजधान्याम्, स्थितः, समुचिता व्यवस्था, सुयोग्याः, स्नेहेन, क्रीडाक्षेत्रम्, प्रसीदन्ति, मनोयोगेन, पाठयन्ति, मृदुस्वभावाः

प्रश्न 4. रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं प्रपूर्य पुनः लिखत - (5×1=5)

विनोदः – अंकित। श्वः भवान् कुत्र गमिष्यति ?

अंकितः- अहं (1) ------------ गमिष्यामि ।

विनोदः - तत्र किमपि कार्य वर्तते ? अथवा भ्रमणार्थम् एव गच्छति ?

अंकितः - कार्यं नास्ति, अहं तु (2) ------------- सह भ्रमणार्थं गच्छामि।

विनोदः - जयपुरे कुत्र-कुत्र भ्रमणस्य (3) ------------- अस्ति?

अंकितः - वयं तत्र आमेर-दुर्गं, जयगढदुर्गं, गोविन्ददेवमन्दिरं च द्रक्ष्यामः ।

विनोदः - तत्र नाहरगढ़-दुर्गमपि पश्यतु । तदपि (4) ------------- अस्ति ।

अंकितः - यदि समयः अवशिष्टः भविष्यति तर्हि निश्चयेन तत्र गमिष्यामः ।

विनोदः - बाढ़म् मित्र । नमस्ते। इदानीम् अहं गच्छामि। सोमवासरे आवां पुनः मिलिष्यावः। तदा (5) ------------- वार्तालापं करिष्यावः ।

मञ्जूषा

मित्रैः, दर्शनीयम्, आवां, जयपुरम्, कार्यक्रमः

अथवा

मञ्जूषापदसाहाय्येन कथायाः रिक्तस्थानानी पूरयित्वा कथां पुनः लिखत - (10×½=5)

वीरबालकः अभिमन्युः

अभिमन्युः निजबलेन सह (i) --------- अगच्छत्। सः एकाकी एव चक्रव्यूहस्य प्रवेशद्वाराणां (ii) ---------- सफलोऽभवत्, तस्य कोऽपि योद्धा अन्तः प्रवेष्टुं न समर्थः। साहसी बालकः (iii) --------- एव षट् प्रवेशद्वाराणि त्रोटयित्वा चक्रव्यूहस्य अन्तः प्राविशत् । सप्तमे प्रवेशद्वारे तस्य सप्तमहारथिभिः सह घोरं युद्धं जातम्। (iv) --------- अतुल्यां बाणवृष्टिं दृष्ट्वा सर्वे (v) --------- मिलित्वा तस्योपरि युगपदेव (vi) --------- अकुर्वन्। एकतः एकाकी बालकः आसीत् अपरतः (vii) --------- सप्त महारथिनः। कुत्र गता (viii) --------- ? चिरकालं (ix) ---------- युद्धं कुर्वन् अन्ततः सः वीरः वीरगति प्राप्तः। धन्योऽयं वीरबालकः। धन्या चैयं वीरभूमिः यत्र एतादृशाः वीराः बारम्बारं (x) ---------

मञ्जूषा – युद्धभूमिम्, युद्धकलानिष्णाताः, जायन्ते, महारथिनः, एकाकी, युद्धमर्यादा, यावत्, वीरबालकस्य, आक्रमणं, भेदने

'ग' खण्डः

अनुप्रयुक्तव्याकरणम् (25 अङ्काः)

प्रश्न 5. अधोलिखितवाक्येषु रेखांकितपदानां संधिं विच्छेदं वा कृत्वा लिखत - (4×1=4)

(i) ने + अनं शरीरस्य अतीव महत्तवपूर्णम् अंगम् अस्ति ।

(ii) सन्नायिका उत्तमम् अभिनयं करोति।

(iii) अस्माभिः मातुर्वचनं पालनीयम् ।

(iv) निः + उपायाः सेवकाः तूष्णीम् अतिष्ठन् ।

अथवा

(i) अथ <u>प्रथमोऽध्यायः</u> आरम्भः ।

(ii) <u>तिरस्कारः</u> कस्मै अपि ना रोचते।

(iii) <u>स्वराट् + गायत्री</u> वाग्ब्रह्म एव।

(iv) <u>वाणी + एका</u> समलङ्करोति।

प्रश्न 6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा कृत्वा लिखत - (4×1=4)

(i) नासिकनगरं <u>तपोवनम्</u> अस्ति।

(क) तपं वनम् (ख) तपस्यां वनम्

(ग) तप: वनम् (घ) तपसः वनम्

(ii) <u>वेदपाठी</u> बटुकः वेदं पठति।

(क) वेदस: पाठी (ख) वेदान् पठति इति

(ग) वेदस्य पाठकः (घ) वेदान् पाठयति इति

(iii) देवानां <u>पाणिपादम्</u> वंदनीयं भवन्ति।

(क) पाणी च पादम् (ख) पाणौ च पादौ च

(ग) पाणी च पादौ च तेषां समाहारः (घ) पाणी च पादश्च तेषां समाहारः

(iv) <u>सरामं</u> सीता वनम् गच्छति।

(क) रामया सहितेन (ख) राम सहितम्

(ग) रामेण सहितम् (घ) रामात् सहितम्

प्रश्न 7. रेखाङ्कितपदेषु प्रकृति-प्रत्ययोः संयोजनं विभाजनं वा कृत्वा पुनः लिखत - (4×1=4)

(1) कथं <u>मन्दभाग्या</u> अहं धैर्यं धरामि।

(क) मन्दभाग्य + आ (ख) मन्दभाग्य + आ

(ग) मन्दभाग्य + टाप् (घ) मन्दभाग्यिन् + टाप्

(ii) भवान् <u>गतिमान्</u> भवतु।

(क) गतिमान् + वतुप् (ख) गति + मतुप्

(ग) गति + तल् (घ) गतिमान् + ठक्

(iii) भारतस्य <u>नगर + ठक्</u> श्रेष्ठः अस्ति।

(क) नगरिकः (ख) नागरिकः

(ग) नागरिक (घ) नागरिकी

(iv) <u>चपल + तल्</u> बालकस्य बुद्धिः तीक्ष्णा वर्तते।

(क) चपलता (ख) चपलस्य

(ग) चपलः (घ) चपलताम्

प्रश्न 8. अधोलिखितं संवादं कर्तृ-कर्मवाच्ये परिवर्त्य उत्तरपुस्तिकायां लिखत- (3×1=3)

नयना – नयना! त्वं किं करोषि ?

सुमेशः – अधुना तु ------- पुस्तकं पठ्यते |

नयना – शोभनं अधुना त्वं पुस्तकं -------- |

सुमेशः – --------- किं क्रियते ?

मञ्जूषा - त्वया, पठसि, मया

अथवा

वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत -

(i) अद्य मया कथाः -------- |

(ii) छात्रेण ------- लिख्यन्ते |

(iii) ------- रमेण सह वनं गम्यते |

मञ्जूषा - कथाः, श्रूयन्ते, सीतया

प्रश्न 9. अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पुरयत- (3×1=3)

(i) प्रातः (7:45) --------- वादने विद्यालयस्य प्रार्थना भवति ।

(ii) अनन्तरं (8:15) -------- वादने कक्षाः आरभन्ते ।

(iii) मध्याह्ने (12:00) ------ वादने भोजनावकाशः भवति ।

प्रश्न 10. इमं संवादम् उचितैः अव्ययपदैः पूरयत - (4×1=4)

मञ्जूषा - किमर्थम्, सम्प्रति, बहिः, श्वः

(i) अहम् नाटकं द्रष्टुं --------- गमिष्यामि ।

(ii) -------- सर्वे छात्राः कक्षासु सन्ति ।

(iii) विद्यालयाद् -------- एकं सुन्दरम् उद्यानम् अस्ति ।

(iv) ते बालाः ------- ग्रामं अगच्छन् ?

प्रश्न 11. अधोलिखितवाक्येषु रेखांकित अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - (3×1=3)

(i) छात्रा - महोदय ! साम्प्रतं वयं किं पठामि ?

(क) पठामः (ख) पठावः (ग) पठति (घ) पठसि

(ii) शिक्षिका - पुत्रि ! वयं सम्प्रति संस्कृतं पठिष्यथ ।

(क) पठिष्यसि (ख) पठिष्यामः (ग) पठिष्यथ (घ) पठिष्यन्ति

(iii) छात्रा - भवती संस्कृतस्य के पाठं पाठयिष्यति ?

(क) कस्य (ख) किम् (ग) कम् (घ) कयो

'घ' खण्ड:

पठितावबोधनम् (30 अङ्का:)

प्रश्न 12. अधोलिखितान् पद्यांशान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥
चञ्चलं हि मनः कृष्ण । प्रमाथि बलवद्दढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (2×½=1)

(i) श्रीकृष्णः अर्जुनं कानि संयन्तुम् (नियन्तुम्) उपदिशति ?

(ii) अर्जुनस्य कृते किं सम्बोधनपदमत्र श्लोके प्रयुक्तम् ?

(iii) प्रमाथि बलवद्दढम् किम् अस्ति ?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) (2×1=2)

(i) श्रीकृष्णः अर्जुनं के मारयितुम् उपदिशति ?

(ii) इन्द्रियाणां संयमः कदा करणीयः ?

(iii) मनसः वशीकरणं केन समं दुष्करम् ?

III. निर्देशानुसारम् उत्तरत- (2×1=2)

(i) 'मारय' इति पदस्य पर्यायरूपे किं पदमत्र श्लोके प्रयुक्तम् ?

(ii) 'त्वम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

अथवा

(i) 'ज्ञानविज्ञाननाशनम्' कस्य पदस्य विशेषणम् अस्ति ?

(ii) अस्मिन् श्लोके 'मन्ये' इति क्रियापदस्य कर्तृपदं किम् ?

प्रश्न 13. अधोलिखितान् गद्यांशान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

अनेन वचसा प्रतिहतान्तःकरणः प्रच्छन्नभाग्यः अचिन्तयत्-किम् इदं वचनं माम् एव लक्ष्यीकरोति ? अहो! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा। गुरूपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते। अद्यप्रभृति पापपथं त्यजामि' इति विचिन्त्य मित्रं दुष्टबुद्धिम् अवदत् - "सखे! यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्।" दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत् । प्रच्छन्नभाग्यः तु समुपजातविवेकः स्वगृहं प्रतिनिवृत्तः ।

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (2×½=1)

(i) 'अद्यप्रभृति पापपथं त्यजामि ।' इति कः अचिन्तयत्?

(ii) क्लेशपरम्परा कम् आश्रितस्य भवति ?

(iii) प्रच्छन्नभाग्यः कुत्र प्रतिनिवृत्तः ?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) (2×1=2)

(i) सद्वचनानि तिरस्कृत्य दुष्टबुद्धिः कुत्र अगच्छत् ?

(ii) 'अद्यप्रभृति पापपथं त्यजामि ।' इति कः अचिन्तयत्?

(iii) कः कस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत् ?

III. निर्देशानुसारम् उत्तरत- (2×1=2)

(i) 'चक्षुषी' इति कर्तृपदस्य क्रियापदं किम् अस्ति ?

(ii) अनुच्छेदे 'पन्थानम्' इति विशेष्यपदस्य विशेषणपदम् अस्ति-

अथवा

(i) 'प्राचलत्' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

(ii) 'नेत्रे' अस्य पर्यायवाचिपदं गद्यांशात् चिनुत ।

प्रश्न 14. अधोलिखितनाट्यांशान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

श्रीकृष्णः - स तु चकम् एव अयाचत। गृहाण चक्रम् इति उक्तः सः सव्येन पाणिना चक्रम् गृहीतवान्, किन्तु सः तत् चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः न अभवत् ।

युधिष्ठिरः - जानीमः भवतः दिव्यां शक्तिम् ।

श्रीकृष्णः - तदा अहं नैराश्येन खिन्नं द्रौणिं पृष्टवान् 'वत्स ! किमर्थं त्वम् इदं दिव्यं चक्रं वाञ्छसि?'

युधिष्ठिरः - किम् उक्तं तेन?

श्रीकृष्णः - पार्थ पश्य, पश्य। एतद् विमुच्यते ब्रह्मास्त्रं द्रोणपुत्रेण! त्रैलोक्यं दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति । अर्जुन! अर्जुन ! त्वमपि मुञ्च ब्रह्मास्त्रं एतत् निवारयितुम् ।

अर्जुनः - नमः भगवते। स्वस्ति आचार्यपुत्राय। स्वस्ति मे भ्रातृभ्यः । उत्सृज्यते मया ब्रह्मास्त्रम्। अस्त्रम् अस्त्रेण शाम्यताम्

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (2×½=1)

(i) युधिष्ठिरः कस्य दिव्यां शक्तिं जानाति?

(ii) द्रौणिः श्रीकृष्णात् कीदृशं चक्रं वाञ्छति ?

(iii) 'नमः भगवते' इति कः अवदत् ?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) (2×1=2)

(i) श्रीकृष्णः कीदृशं द्रौणिं पृष्टवान् ?

(ii) द्रौणिः किं कर्तुं समर्थः न अभवत् ?

(iii) ब्रह्मास्त्रस्य प्रभावेण किम् भवति ?

III. निर्देशानुसारम् उत्तरत- (2×1=2)

(i) 'दिव्यां शक्तिम्' अनयोः पदयोः विशेष्यपदं किम्?

(ii) 'अलौकिकीम्' इत्यस्य पदस्य कः पर्यायः?

अथवा

(i) 'मुञ्च' इति क्रियायाः संवादे कर्तृपदं किम् ?

(ii) 'उत्सृज्यते मया ब्रह्मास्त्रम्।' अस्मिन् वाक्ये क्रियापदं किम् ?

प्रश्न 15. रेखांकितपदान् आधृत्य प्रश्ननिर्माणं कुरुत – (5×1=5)

(1) <u>नीतिविदाम् अग्रणी:</u> वानरयूथपतिः अचिन्तयत्।

(2) मातरः <u>शिशून्</u> कथयन्ति ।

(3) <u>अर्थिनः</u> धनलाभ मात्रेण संतोषं भजन्ते।

(4) <u>दानशालासु</u> विचरन् राजा अचिन्तयत् ।

(5) नास्ति <u>त्यागसमं</u> सुखम्।

प्रश्न 16. अधोलिखितश्लोकस्य अन्वयं समुचितपदैः पूरयत - (4×½=2)

परमापद्गतेनापि नैव तात त्वया रणे।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः॥

अन्वयः - गुरुः द्रोणः स्वपुत्रं वदति-हे पुत्र ! यदि त्वं (i) ----------- परमापदम् अपि (ii) --------- तदापि इदं प्रलयकारि (iii) --------- कदापि (iv) ----------- न प्रयोगं कुर्याः ।

मञ्जूषा

मनुष्येषु, अस्त्रम्, प्राप्नुयाः, युद्धे

अथवा

क्रन्दनं वर्धते तस्य नान्तं समधिगच्छति ।
व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत् ॥

अन्वयः - यः (नरः) (i) ------- प्राप्य (ii) --------- केवलं परिदेवयेत्, तस्य (iii) ------- वर्धते अन्तम् च न (iv) --------- |

मञ्जूषा

क्रन्दनम्, मोहात्, व्यसनम्, समधिगच्छति

प्रश्न 17. रेखाङ्किङ्कतपदेषु प्रसङ्गनुसारम् उचितम् अर्थचयनं कुरुत- (4×1=4)

(i) मेषः महानसं प्रविश्य यत् पश्यति तत् भक्षयति ।

(क) हशाला (ख) भूमौ (ग) पाकशालाम् (घ) मन्दिरम्

(ii) सपदि उपायः क्रियताम् ।

(क) अवलोक्य(ख) झटिति (ग) विहाय (घ) पादेन सह

(iii) तस्मात् त्वम् आदौ इन्द्रियाणि नियम्य पाप्मानं प्रजहि।

(क) सर्वप्रथमम् (ख) रात्रौ (ग) दिने (घ) मन्दिरम्

(iv) आपदां तरणिः धैर्यम्।

(क) सूर्यः (ख) नौका (ग) धैर्यम् (घ) तरणम्

प्रश्न 18. मञ्जूषायाः सहायतया पाठाधारित कथापूर्तिं कुरुत- (8×½=4)

अथ पर्यटनाधिकारी (i) --------- अरुणाचलप्रदेशस्य ऐतिहासिकस्थलानां दर्शनं कारयति। सर्वप्रथमं स दिवाङ्ग उपत्यकामण्डले स्थितं (ii)------ दर्शयति । यस्य अवशेषाः तु (iii) ------- परिचायकाः सन्ति । ततः सः मनोहरे सुरम्ये तवाङ्ङ्ग स्थले स्थितं (iv) -------- इति बौद्धमठं दर्शयति। अयं मठः (v) --------बौद्धभिक्षुणां निवासयोग्यः वर्तते । (vi) --------- अपि अनेके बौद्ध विहाराः सन्ति । तत्पश्चात् सः छात्रान् (vii) --------- इति दर्शनीयस्थलस्य विषये वदति । यत् इदं कुण्डं (viii) ---------- किञ्चिद्दूरे अस्ति । पूर्वम् अस्य नाम ब्रह्मकुण्डम् आसीत्। इदं कुण्डमेव लोहितनद्याः उद्गमस्थलं कथ्यते। इति अत्र अनेकानि दर्शनस्थलानि सन्ति । अधुना वयं जलपानाद् अनन्तरं तेषां दर्शनाय गमिष्यामः ।

मञ्जूषा

प्रक्षेपकयन्त्रेण, लोहितनद्याः, परशुरामकुण्डम्, लोहितजनपदे, पञ्चशतानाम्, तवाङ्ङ्ग गोम्पा, आर्यकाल-संस्कृति-सम्पदः, भीष्मकनगरदुर्गम्

======================= सफलतायै शुभाशयाः ===================